जवासजो मदभ्रान्तिपित्तासृक्कुष्ठकासजित् ।
मञ्जिष्ठोऽत्यन्तबलकृत् श्लीपदमोहानिलार्त्तिजित् ।
अपामार्गभवश्छर्दिकफमेदोऽनिलापहः ॥
आरक्तापामार्गभवो धातुस्तम्भनकारकः ।
कोकिलाक्षभवः शीघ्रं शेफाच्छोफान्निवारयेत् ॥
अस्थिसंहारिकायास्तु भग्नसन्धानकृच्छिवे ।
कुमारिकाया उत्थोऽग्निदग्धविस्फोटकान् जयेत् ॥
पुनर्नवायाः श्वेतायाः सर्व्वनेत्रामयापहः ।
पुनर्नवाया रक्ताया ग्राही पित्तास्रनाशनः ॥
प्रसारिण्या वातहरो वृष्यः सन्धानकृत् सरः ।
सारिवाया वह्निमान्द्यकासामविषनाशनः ॥
भृङ्गराजस्य दत्तोऽर्कः केश्यस्त्वच्यः शिरोऽर्त्तिहृत् ।
शणपुष्पीलतायास्तु अर्कः पित्तकफान्तकः ॥
त्रायन्त्यर्कः शूलविषविलेपीज्वरनाशनः ।
मूर्व्वाया मोहहृद्रोगकण्डूकुष्ठज्वरापहः ॥
काकमाचा नेत्रहितश्छर्दिहृद्रोगनाशनः ।
काकनासाभवो वामी शोथार्शश्वित्रकुष्ठहृत् ॥
काकजङ्घोद्भवो हन्यात् ज्वरकण्डूविषक्रिमीन् ।
नागिन्यास्तु हरेच्छूलयोनिदोषवमिक्रिमीन् ॥
मेषशृङ्ग्याः श्वासकासव्रणश्लेष्मादिशूलहा ।
हंसपद्या हन्ति शूलभूतरक्तविषव्रणान् ॥
सोमवल्ल्यास्त्रिदोषघ्नः क्षीरदश्च रसायनः ।
आकाशवल्ल्याः शीतोऽर्कः पित्तश्लेष्मामनाशनः ॥
पातालगरुडीजातोऽर्को वृष्यः पवनापहः ।
वन्दाकवृक्षोद्भवोऽर्कस्तु विषरक्षोव्रणापहः ॥
वटपत्रीभवश्चोष्णो योनिमूत्रगदापहः ।
हिङ्गुपत्र्या विबन्धार्शःश्लेष्मगुल्मानिलापहः ॥
वंशपत्र्याः पाचनोष्णो हृदस्तिगदसंघहृत् ।
मत्स्याक्ष्यर्को ग्राहिशीतकुष्ठपित्तकफास्रजित् ॥
सर्पाक्ष्या रोपणः सर्पवृश्चिकोन्दुरदंशहृत् ।
शङ्खपुष्प्या विषहरः स्मृतिकान्तिबलाग्निदः ॥
अर्कपुष्प्याः क्रमिश्लेष्ममेहपित्तविकारजित् ।
लज्जालुकाया भगरुग्रक्तपित्तातिसारहृत् ॥
अलम्बुषासम्भवोऽर्कः क्रमिपित्तकफापहः ।
दुग्धिकायाः कफहरो वृष्यस्तम्भी क्रिमिप्रणुत् ॥
भूम्यामलक्याः कासक्षयाकफपाण्डुक्षतापहः ।
ब्राह्म्या बुद्धिप्रदश्चार्कः मासमासाभ्यासतः कविः ॥
ब्रह्ममण्डुकिका पाण्डुविषशोथज्वरान् हरेत् ।
द्रोणपुष्प्या ज्वरश्वासकामलाशोथजन्तुजित्
सूर्य्यमुख्या हरेत् स्फोटयोनिरुक्क्रमिपाण्डुताः ।
बन्ध्याकर्कोटिकाजातः सर्पदर्पव्रणापहः ॥
मार्कण्डिकाया दुर्गन्धविषगल्मोदरापहः ।
देवदाल्याः शूलगुल्मश्लेष्मार्शोवातजित् परः ॥
धत्तूरजो ग्राहिहिमो वह्निकृद्व्रणदाहहा ।
गोजिकाया मेहकासव्रणमारज्वरापहः ॥
नागपुष्प्याः सर्पविषसर्व्वग्रहनिवारणः ।
वेल्लन्तरो मूत्रघाताश्मशोथोन्यनिलार्त्तिजित् ॥
क्षिकान्या वह्निरुचिकृदर्शःकुष्ठक्रमिप्रणुत् ।
कौकुन्दरो ज्वरं रक्तं मुखशोषं कफं हरेत् ॥
सुदर्शनार्कस्यात्गुणाः कफशोथास्रवातजित्" ।
इति श्रीलङ्कानाथकृतार्कचिकित्सायामौषध्यर्क-
विधानं तृतीयशतकं ॥ * ॥ अतःपरं नानौषध-
विधानं चतुर्थशतकं । नानारोगनिवारणार्थं
पञ्चमशतकं । विस्फोटकनिवारणार्थं षष्ठशतकं ।
क्षुद्ररोगादेर्निवारणं सप्तमशतकं । कार्म्मणं ना-
माष्टमशतकं । गणसंख्या नवमशतकं । धातु-
शुद्धिर्दशमशतकं । एतत् सर्व्वं अर्कप्रकाशे
रावणमन्दोदरीसंवादे अस्ति बाहुल्यभिया न
लिखितं ॥
("अर्कक्षीरं सुधाक्षीरं तिक्ततुम्ब्याश्च पल्लवाः ।
करञ्जो वस्तमूत्रञ्च लेपनं श्रेष्ठमर्शसां" ॥
इति चक्रपाणिसङ्ग्रहः ॥ * ॥
"अर्कालर्ककरञ्जद्वयनागदन्तीमयूरकभार्गीरास्ने-
न्द्रपुष्पीक्षुद्रश्वेतामहाश्वेतावृश्चिकाल्यलवणा स्ता
पसवृक्षश्चेति" । इति अर्कादिगणः ॥
"अर्कादिको गणो ह्येष कफमेदोविषापहः ।
क्रिमिकुष्ठप्रशमनो विशेषाद्व्रणशोधनः" ॥
इति सुश्रुतः ॥)

अर्ककान्ता, स्त्री, (अर्कोऽर्ककिरणः कान्तोऽनुकूलो यस्याः सा, कम् + क्तः स्त्रियां टाप् ।) आदित्त-भक्ता । इति राजनिर्घण्टः ॥ ऊड़्ऊड़िया इति ख्याता । इति राजनिर्घण्टः ॥ (अस्या गुणा आदित्यभक्ताशब्दे ज्ञातव्याः ॥)

अर्कचन्दनं, क्ली, (अर्कस्य प्रियं चन्दनं, षष्ठीतत्पुरुषः ।) रक्तचन्दनं । इति राजनिर्घण्टः ॥ (रक्तचन्दनशब्देऽस्य गुणावली ज्ञेया ॥)

अर्कजौ, पुं, (अर्काज्जायेते यौ, अर्क + जन् ड, पञ्चमीतत्पुरुषः ।) अश्विनीकुमारौ । नित्यद्विवचनान्तशब्दोऽयं । इति हेमचन्द्रः ॥

अर्कतनयः, पुं, (अर्कस्य तनयः, षष्ठीतत्पुरुषः ।) कर्णराजः । इति हेमचन्द्रः ॥ वैवस्वतमनुः । सावर्णिमनुः । शनिः । यमः । यमुनायां तपत्याञ्च स्त्री । इति महाभारतं ।

अर्कनन्दनः, पुं, (अर्कस्य नन्दनः, षष्ठीतत्पुरुषः ।) अर्कतनयः । इति त्रिकाण्डशेषः ॥

अर्कपत्रः, पुं, (अर्कः सूर्य्यइव तीक्ष्णं पत्रं यस्य सः ।) आदित्यपत्रवृक्षः इति राजनिर्घण्टः ॥

अर्कपत्रा, स्त्री, (अर्कः सूर्य्यइव तीक्ष्णं पत्रं यस्याः सा ।) वृक्षविशेषः । इशेर मूल इति भाषा । तत्पर्य्यायः । सुनन्दा २ अर्कमूला ३ विषापहा ४ । इति रत्नमाला ॥

अर्कपर्णः, पुं, (अर्क इव रक्तं पर्णमस्य सः ।) अर्कवृक्षः । इत्यमरः ॥ आकन्द इति ख्यातः । (अस्य विशेषोऽर्कशब्दे ज्ञातव्यः ।)

अर्कपादपः, पुं, (अर्कः अर्कवृक्षइव तीक्ष्णः पादपः ।) निम्बवृक्षः । इति त्रिकाण्डशेषः ॥

अर्कपुष्पिका, स्त्री, (अर्कस्यार्कवृक्षस्य पुष्पमिव पुष्पमस्याः सा, जातित्वात् ङीप् कप् ।) वृक्षभेदः । अर्कहुली ऊलीपुष्पेति ख्याता । तत्पर्य्यायः । पयस्या २ सूर्य्यवल्ली ३ सितपर्णी ४ । इति रत्नमाला ॥

अर्कपुष्पी, स्त्री, (अर्कस्यार्कवृक्षस्य पुष्पमिव पुष्पमस्याः सा, जातित्वात् ङीप् ।) कुटुम्बिनीवृक्षः । तत्पर्य्यायगुणाः ।
"अर्कपुष्पी क्रूरकर्म्मा पयस्या जलकामुका ।
अर्कपुष्पी क्रमिश्लेष्ममेहपित्तविकारजित्" ॥
इति भावप्रकाशः ॥ राजनिर्घण्टोक्तपर्य्यायगुणाः कुटुम्बिनीशब्दे द्रष्टव्याः ॥

अर्कप्रिया, स्त्री, (अर्कं प्रीणाति, प्री + क, अर्कस्य प्रिया इति वा ।) जवा । इति राजनिर्घण्टः ॥ (जवाशब्देऽस्य विशेषो ज्ञातव्यः ॥)

अर्कबन्धुः, पुं, (अर्कस्य बन्धुरिव ।) गौतमः । स च इक्ष्वाकुकुलोद्भवशाक्यवंशीयबुद्धः । इत्यमरः ॥

अर्कबान्धवः, पुं, (बन्धुरेव बान्धवः, बन्धु + स्वार्थे अण्, अर्कस्य बान्धवः, षष्ठीतत्पुरुषः ।) अर्कबन्धुः इति हेमचन्द्रः ॥

अर्कभक्ता, स्त्री, (अर्कस्य भक्ता, षष्ठीतत्पुरुषः ।) आदित्यभक्तावृक्षः । इति राजनिर्घण्टः ॥ ऊड़् ऊड़िया इति ख्याता ।

अर्कमूला, स्त्री, (अर्क इव विषधराणां दुःसहं मूलं यस्याः सा ।) अर्कपत्रा । इति रत्नमाला ॥ इशेर मूल इति भाषा ।

अर्करेतोजः, पुं, (अर्कस्य रेतसो जायते, अर्करेतस् + जन् + ड, उपपदसमासः ।) सूर्य्यपुत्रविशेषः । तत्पर्य्यायः । रेवन्तः २ ब्रध्नगः ३ हयवाहनः ४ । इति हेमचन्द्रः ॥

अर्कवल्लभः, पुं, (अर्कस्य वल्लभः, षष्ठीतत्पुरुषः ।) बन्धूकवृक्षः । इति राजनिर्घण्टः ॥ (बन्धूकवृक्षशब्देऽस्य गुणादयो ज्ञेयाः ॥)

अर्कवेधं, क्ली, (अर्केण विध्यते, अर्क + व्यध + पचाद्यच् ।) तालीशपत्रं । इति राजनिर्घण्टः ॥ (तालीशपत्रशब्देऽस्य गुणादिविवरणं ज्ञेयं ।)

अर्कव्रतं, क्ली, (अर्कस्य व्रतं, षष्ठीतत्पुरुषः ।) आरोग्यसप्तम्यादि सूर्य्यव्रतं । इति स्मृतिः ॥ सूर्य्यस्य जलशोषणवत्प्रजाकरग्रहणं । यथा,—
"अष्टौ मासान् यथादित्यस्तोयं हरति रश्मिभिः ।
तथा हरेत् करान्राष्ट्रान्नित्यमर्कव्रतं हि तत्" ॥
इति मनुः ।

अर्कसूनुः, पुं, (अर्कस्य सूनुः पुत्त्रः ।) यमः । इति हेमचन्द्रः ॥

अर्कसोदरः, पुं, (अर्कस्य सोदर इव हितकारी ।) ऐरावतहस्ती । इति हेमचन्द्रः ॥

अर्कहिता, स्त्री, (अर्काय हिता अनुकूला, चतुर्थीतत्पुरुषः ।) आदित्यभक्तावृक्षः । इति राजनिर्घण्टः ॥ ऊड़्ऊड़िया इति ख्याता । (अस्याः विशेष आदित्यभक्ताशब्दे द्रष्टव्यः ॥)

अर्काश्मा, [न्] पुं, (अर्कस्य अनुगतः अश्मा, मध्यपदलोपी कर्म्मधारयः ।) अरुणोपलः । (चुणि इति ख्यातः प्रस्तरभेदः ।) सूर्य्यकान्तमणिरिति यावत् । इति हलायुधः ॥

अर्काह्वः, पुं, (अर्केण आह्वयते यः, अर्क + आ + ह्वे + अप् ।) अर्कवृक्षः । इत्यमरः ॥ आकन्द इति भाषा ।

अर्कोपलः, पुं, (अर्कस्यानुगत उपलः, कर्म्मधारयः ।) सूर्य्यकान्तमणिः । इति राजनिर्घण्टः ॥ (चुणि इति ख्यातो रत्नभेदः । स्फटिकमणिः । "अर्का-